आदित्यम् ।        शास्त्री        05-10-2020

## छन्दविचारः ।

**प्रश्न →** निम्नलिखिते श्लोके छन्दनिर्णयं कुरुत ।

विचिन्तयन्ती यमनन्यमानसा,
तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन्,
कथां प्रमत्तः प्रथमं कृतामिव ॥ अभिज्ञान॰/चतुर्थोऽङ्कः 1

**उत्तरम् →** प्रथमचरणे गणादिनिर्णयः सर्वप्रकारेणास्ति → पद्यस्यास्य समस्तेषु चरणेषु द्वादशाक्षराः सन्ति

विचिन्तयन्ती यमनन्यमानसा,
। ऽ । , ऽ ऽ । , । ऽ । , ऽ । ऽ
जगण , तगण , जगण, रगण

द्वितीयचरणे → तपोधनं वेत्सि न मामुपस्थितम् ।
। ऽ । ऽ ऽ । । ऽ । ऽ । ।
जगण तगण जगण रगण

तृतीयचरणे → स्मरिष्यति त्वां न स बोधितोऽपि सन् ,
। ऽ । ऽ ऽ । । ऽ । ऽ । ऽ
जगण तगण जगण रगण

चतुर्थचरणे → कथां प्रमत्तः प्रथमं कृतामिव ॥
। ऽ । ऽ ऽ । । ऽ । ऽ । ऽ

चतुर्थचरणस्य अंतिमो वर्णः वकारः विकल्पेन (चरणान्ते) गुरुः । जगणादि क्रमानुसारेण इदं लक्षणं वंशस्थ छन्दस्यास्ति । तल्लक्षणं जतौ तु वंशस्थमुदीरितं जरौ ।

05-10-2020

डॉ॰ निर्मल कुमार झा, (सं॰ प्राचार्य)
रा॰ उ॰ सं॰ महावि॰ गुलाबेना, पूर्णिया

04-10-2020

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यप्रथमपत्रम् । संस्कृत-निबन्धः ।

## भारवेरर्थगौरवम् ।

"शब्दप्रयोगनिष्णाताः कवयः सन्ति भूरिशः ।
अर्थगौरवसम्बन्धो भारविः स्तूयते बुधैः ॥"

काव्यसंसारे कविजगति वा एषा उक्तिः प्रचलिता भारवये ।

'शब्दार्थौ काव्यम्' इति परिभाषया निश्चीयते यत् काव्ये शब्दार्थयोः समं प्राधान्यम् । लाक्षणिकैः व्यङ्ग्यकारैश्च शब्दप्रधानं काव्यं अस्वीकृतमस्ति । अतएव अर्थालङ्कारप्रमुखेषु प्रकरणेषु अर्थानां प्राधान्यं सुप्रसिद्धमेव ।

काव्यसारविद् भारविः संस्कृतवाङ्मयस्य जाज्वल्यमानः मणिः महाकविश्रेणीमूर्धानमधिरोहति । अस्य शास्त्रेषु नैसर्गिकः अनुरागः आसीत् बाल्यावस्थादेव । अस्य महाकवेः एकमात्रं काव्यं "किरातार्जुनीयम्" उपलभ्यते । अत्र कवेः पाण्डित्यं चरमोत्कर्षे अस्ति । किरातार्जुनीयम् महाकाव्यं राजनीतिशास्त्रदृष्ट्या सुसमृद्धं विराजते । अत्र दुर्योधनस्य कूटनीति, सामान्यनीतिचर्चा च चर्चिता सचेतसां चेतः चमत्करोति । वनेचरस्य वचनैः नीतिस्रोतस्विनी प्रवहति – 'हितं मनोहारि च दुर्लभं वचः ।' "वरं विरोधोऽपि समं महात्मभिः", "न बाधतेऽस्य त्रिगणः परस्परम्", "अहो दुरन्ता बलवद्विरोधिता" इत्यादयः पद्यांशाः नीतिगर्भाः अर्थगौरवस्य च बीजरूपेणावस्थिताः । "सहसा विदधीत न क्रियामविवेकः परमापदां पदम् । वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥" इदं पद्यं कविवरेण्यस्य सर्वेषां सचेतसां प्रियत्वं भजते ।

अतएव "भारवेरर्थगौरवम्" एषा उक्तिः सुप्रसिद्धा वर्तते ।

(हस्ताक्षर) 04-10-2020

डॉ० निर्मल कुमार झा (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

04-10-2020

संस्कृतसामान्यम् । अष्टादशी I

अनिवार्यप्रथमपत्रम् ।

संस्कृतानुवादं कुरुत ।

1. श्रम के बिना विद्या नहीं होती है।

2. श्रम के बिना तो भोजन भी दुष्प्राप्य होता है।

3. परिवार, समाज, राष्ट्र, हरजगह श्रम का महत्व दिखाई पड़ता है।

4. श्रम के बिना न विद्या होती है और नही धन प्राप्त होता है।

5. छात्रजीवन में तो श्रम का अत्यधिक महत्व है।

6. जीवन में कल्याण चाहने वाले को बचपन से ही श्रम करना चाहिए।

7. कहा गया है कि उद्यम से ही कार्य सिद्ध होते हैं, न कि सोचने से। सोए हुए सिंह के मुँह में पशु (मृग) प्रवेश नहीं करते हैं।

8. अर्थात् सिंह जैसे शक्तिशाली पशु को भी परिश्रम करना पड़ता है।

9. श्रम करके ही दशरथ मांझी ने पहाड़ काट कर रास्ता बनाया।

10. आज आप परिश्रम करेंगे तो कल निश्चय ही फल प्राप्त करेंगे।

छात्र अनुवाद करने का स्वयं प्रयास करें तथा मुझे दूरभाष पर सुनाएँ अथवा वाट्सअप ग्रुप पर दिखाएँ। इसका उत्तर मैं अगले दिन दूँगा।

[signature] 04-10-2020

डॉ० निर्मल कुमार झा (अ०प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ